पदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्तते” शत० ब्रा० १४।५।१।२० । ४देशभवे च “देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु” याज्ञ० । ५वृत्तौ स्त्री ङीष् जानपदी अन्यत्र ङीप् । स्वरे भेदः । नियमपक्षे टाप् इति भेदः । वरणा० बहुत्वे अणो लुक् । जनपदाः ।

**जानश्रुतेय** पु० जनश्रुतेः ऋषेरपत्यम् “इतश्चानिञः” पा० ढक् । जनश्रुतेरपत्ये औपविनामके राजर्षिभेदे “औपविनैव जानश्रुतेयेन प्रत्यवरोढम्” शत०ब्रा० ५।५।१।१।५ ।

**जानायन** पुंस्त्री जनस्य तन्नामकर्षे गोत्रापत्यम् अश्वा०फञ् । जननामकर्षिगोत्रापत्ये ।

**जानु** न० जन–ञुण् । ऊरुजङ्घयोर्मध्यभागे (आंटु) स्वार्थे क अत्रैवार्थे अमरः । “निगृह्य पारीमुभयेन जानुनोः” माघः । “ऊरू अरत्नी जानुनी विशोमेऽङ्गानि सर्वतः” यजु० २७८ “जानुकपिच्छे चतुरङ्गुले च” वृ०स०५८अ०

**जानुकारक** पु० रविपार्श्वगभेदे शब्दार्थचि० ।

**जानुजङ्घ** पु० नृपभेदे । “अनरण्यो नरपतिर्जानुजङ्घस्तथैव च” भा० अनु० १६५ अ० ।

**जानुप्रहृतिक** न० जानुना प्रहृतं प्रहारस्तेन निर्वृत्तम् अक्षद्यूता० ठक् । जानुप्रहारनिर्वृत्ते मल्लयुद्धभेदे ।

**जानुविजानु** न० खड्गयुद्धप्रकारभेदे तत्प्रकाराश्च द्वात्रिंशत् हरिवं० २११ दर्शिता यथा

तत्र तावसिना युद्धं चक्रतुर्बुद्धलालसौ । भ्रान्तमुद्भ्रान्तमाविद्धं प्रविद्धं बहुनिःसृतम् । आकरं विकरं भिन्नं निर्म्मर्यादमनानुषम् । सङ्कुचितं कुलचितं सव्यं जानुविजानु च । आह्रितं चित्रकं चिप्रं क्रुद्रवं लवणं घृतम् । सर्वबाहुर्विनिर्बाहुः सव्येतरमथोत्तरम् । त्रिबाहुतुङ्गबाहू च सव्योन्नतमुदासि च । पृष्ठतः प्रथितञ्चैव यौधिकं प्रथितं तथा । इति प्रकारान् द्वात्रिंशच्चक्रतुः खड्गयोधिनौ” ।

**जानुहित** त्रि० जनैः हितं परिकल्पितम् पृषो० । जनपरिकल्पिते । “एतद्धि वा अस्य जानुहितं प्रज्ञातमवसानं यच्चतुष्पथम्” शत० ब्रा० २।६।२।७ । “जानुहितं जनैः परिकल्पितम्” भा० । [एव च” हरिवं २६ अ० ।

**जान्य** पु० ऋषिभेदे । गार्ग्यः पृथुस्तथैवाग्रे जान्यो वामन

**जाप** पु० जप–घञ् । जपे मन्त्रोच्चारणे कर्म्मण्युपपदे अण् । मन्त्रजापादयः मन्त्रादिजपकर्त्तरि त्रि० । [धरणिः ।

**जापन** न० । चु० जप–भावे ल्युट् । १निरसने २निवर्त्तने च

**जाबाल** पु० जबालाया अपत्यम् अण् । सत्यकामे ऋषिभेदे जबालशब्दे उदा० । तेन दृष्टं साम अण् । २सामवेदीये उपनिषद्भेदे च उपनिषच्छब्दे १२२२ पृ० दृश्यम् । एतस्मिन् परे कर्मधारये महच्छब्दस्य प्रकृतिस्वरः महाजाबालः। महच्छब्दस्यान्तोदात्तः। तदीयस्वर एव न समासस्वरः।

**जाबालि** पु० जबालस्यापत्यम् इञ् । ऋषिभेदे स च उपस्मृतिकर्त्ता । जातूकर्णशब्दे प्रमाणं दृश्यम् ।

**जामदग्न्य** पु० जमदग्नेरपत्यम् गर्गा० यञ् । जमदग्नेः ऋषेरपत्ये परशुरामादौ । “तेजोभिर्गतवीर्य्यत्वात् जामदग्न्यो जडीकृतः” रामा० बा० ७७।१२ । कण्वा० ततोऽण् यलोपः । जामदग्न तच्छात्रे ।

**जामदग्नेय** पु० जमदग्नेरपत्यं प्रत्ययविधौ तदन्तग्रहणस्य प्रतिषेधेऽपि आर्षत्वात् “अग्निकलिभ्याम्” पा० ढक् । परशुरामे “भार्गवं जामदग्नेयं राजा राजविमर्द्दनम्” रामा० बा० ७४ अ० । [दृश्यम् ।

**जामल** न० आगमशास्त्रभेदे । तस्य वर्ग्यादित्वमपि रुद्रजामले

**जामा** स्त्री जम–अदने बा० अण् स्त्रीत्वम् । दुहितरि । “अन्यत्र जामया सार्द्धं प्रजानां पुत्र ईहते । दुहितान्यत्र जातेन पुत्रेणापि विशिष्यते” भा० अनु०४५ अ० । “जामया कन्यया स्वाङ्गं पुत्रः पितरं मनमीहते” इत्यर्थः नीलक० ।

**जामातृ** पु० जायां माति मिनोति मिमीते वा निपा०।१दुहितृपतौ, अमरः । २सूर्य्यावर्त्ते, स्वामिनि च मेदि० उणादिषु निपातनसिद्धत्वेन तृन्नन्तत्वाभावात् सर्वनामस्थाने परे न वृद्धिः । जामातरौ जामातरः इत्यादिः “ऋत्विक्स्वस्त्रियजामातृयाज्यश्वशुरमातुलाः” याज्ञ० । “विष्णुं जामातरं मन्ये” ।

**जामि(मी)** स्त्री जम-इन् नि० वृद्धिः । १भगिन्यां २कुलस्त्रियां, अमरः ३दुहितरि, ४स्नुषायां, ५सन्निहितसपिण्डस्त्रियाम्, शब्दार्थचि० “जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः” “शोचन्ति जामयो यत्र विनश्यन्त्याशु तत्कुलम् । शोचन्ति तु न यत्रैता वर्द्धते तद्धि सर्वदेति” मनुः । “गृहपतिसंवर्द्धनीयसन्निहितसपिण्डस्त्रियो जामय इति” कुल्लू० वा ङीप् । तत्रार्थे शब्दर० । “मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्य्यया । दुहित्रा दासवर्गेण विवादं न समाचरेत्” भा० शा० २४३अ० । स्त्री ब० व० । ६उदके ७अङ्गुलौ निघण्टुः ।

**जा(या)मित्र** न० “जा(या)मित्रं सप्तमं स्थानम्” ज्योतिषपरिभाषिते लग्नात् सप्तमे स्थाने । “तिथौ च जा(या)